① पैज = 1 26 × 11 × 0.1 c.m.

विषय - अनुपलब्ध 25

~~श्लोक~~: स्वाभिरुच्चैर्नशाधेप: त्रिमित्रीन्चैर्य

पोगरत्तदाशेय: स्वंयरोनायकोभवेत् स्वक्षेत्र -त्या।

② पेज = 1

विषय - दर्शन

- 28 × 11.3 × 0.1 c.m.

मन: शरीराधिष्ठानास्ते बाले खनवृंदणास

स्यादित्यमात्सर्यकामलोभ ध्रष्टतय: पत्क्षे

③ पेज = 9

विषय = पुराण

= 26 × 14.5 × 0.2 c.m

कोगो मयंवापेननिशयांतयोदकं नगोमूत्रप्रदोषे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्नानकर्माणि सादित्यांथाश्विमां संध्या

④ विषय - व्याकरण
पेज - 1
- 30 × 13 × 0.1 c.m.

त्कट सुं लिजमिशाने छातोंदीर्घोमिपातनात
... ...
मेदिनीकुशी छेदनेनस: प्रत्ययोनिपातनात

⑤ गयातीर्थ
पेज = 1
= 28 × 13 × 0.1 C.m.

श्री गणेशायनमः श्री सनत्कुमार उवाच
... ...
गयानाम्ना गया स्थानं नक्षत्रं ब्रह्मर्षिकोषि
कोशातीपितर:

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वमित्रक्षैर्नराधिपः त्रिभिर्नीचैर्भवेदासस्त्रिभिरस्तगतैर्यवः २३ उदितः स्व
गृहस्थस्वामित्रगेहस्थितोपिवा मित्रवर्गेणदृष्टस्सद्ग्रहैः सबलस्थिताः
२४ दशमेबुधः स्यौ च भौमे राहौ च षष्ठगौ राययोगोत्रयोयातः स
उमान्नायकोभवेत् २५ स्वामिनाबलिनादृष्टः सबलैश्शुभग्रहैः नदृष्टो
न युतः पापैः सलग्नसबलस्थितः २६ आदौ जीवः स्थानिस्थिते ग्रहामध्ये
निरंतरं राजयोगं विजानियात्कुटुंबबलसंयुतं २७ सहजस्थ्या यदा जीवो
मत्युस्थानेजदासितः निरंतरग्रहामध्ये राजाभवति निश्चितं २८ जी
वोवृषेस्थधारस्मिनि चुने मकरेकुजः सिंहेभवति सौरिश्चयातकं न्यायां
बुधभास्करौ २९ तुलायामसुराचार्ये राजयोगो भवेदयं अत्रयोगे
समुत्पन्नाः महाराजो भवेन्नरः ३० अथमेषादिद्वादशभावजदिजीवतिमानवः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ल०
३

वं सर्वभौमस्तदा राजा जायते विश्वपालकः ३१ त्रिकोणे जीवो जन्मदा लग्ने सर्वे योगास्त
दा शुभाः दीर्घजीवी महाभाग्ये जातको नायको भवेत् ३२ धने शुक्रे व्ययभौम
व्ययमीने जीवस्तुले बुधः मीनस्थो पूर्णचंद्रो च राजयोगोभिधीयते ३३
अस्मिन्योगे च यो जातः स राजा धनवर्जिताः दाता भोक्ता च विख्यातो मान्यो मंड
लनायकः ३४ मीने शुक्रो बुधयां तेध ने राहुस्तनौ रविः सप्तजे च भवेन्द्रो मा रा
जयोगमिधीयते ३५ सहजे च यदा जीवो लाभस्थाने च चंद्रमाः स राजा गज
हमच्च स्यो विख्यातः कुलदीपकः ३६ शुभग्रहाः शुभः दैत्रे भवति यदि केंद्रगा
तदा शुभानि कर्माणि करोत्येव च जातकः ३७ उच्चस्थानगताः सौम्याः केंद्रस्था
न भवंति च ध्रुवं राज्यं भवेत्तस्य तस्य वंशस्य चे योधकः ३८ धने व्ययेतथा लग्ने
सप्तमे च यदा ग्रहाः छत्रयोगस्तदा ज्ञेयः स्ववंशे नायको भवेत् ३९ स्वदेशे च स्थो

राम
३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

॥४॥

मनः शरीराधिष्ठानास्तेषां लेखनवृंहणसंशोधनसंशमना
हाराः सम्यक्प्रयुक्ता निगृह्णन्ति वा मनंति ॥ प्राणिनां पुन
र्मूलमाहारो बलवर्णौजसां च स षट्सु रसेष्वायत्तः ॥ रसाः
पुनर्द्रव्याश्रयाः द्रव्याणि पुनरोषधयः ॥ तास्तु द्विविधाः स्थाव
रा जंगमाश्च तासां स्थावराश्चतुर्विधाः ॥ वनस्पतयो वृक्षा
वीरुध ओषधय इति ॥ तास्वपुष्पाः फलवंतो वनस्पतयः ॥
पुष्पफलवंतो वृक्षाः ॥ प्रतानवत्यः स्तंबिन्यश्च वीरुधः ॥ फल
पाकनिष्ठा ओषधय इति ॥ जंगमाः खल्वपि चतुर्विधाः जरा
युजांडजस्वेदजोद्भिज्जाः ॥ तत्र पशुमनुष्यव्यालादयो जरायुजाः
खगसर्पसरीसृपप्रभृतयोंडजाः ॥ कृमिकीटपिपीलिकाप्रभृत का
यः स्वेदजाः ॥ इंद्रगोपमंडूकप्रभृतय उद्भिज्जाः ॥ तत्र स्थाव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गांभूयईहोपदेष्टुं ॥ अथास्मिन्शास्त्रे पंचमहाभूतशरीरिस-
मवायः पुरुष इत्युच्यते ॥ तस्मिन्क्रियाधिष्ठानं कस्मात् लोक-
स्य द्वैविध्यात् ॥ लोको हि द्विविधः ॥ स्थावरो जंगमश्च द्वि-
धात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात् ॥ पंचात्मको वा तत्र च-
तुर्विधो भूतग्रामः स्वेदजांडजोद्भिज्जजरायुजसंज्ञः ॥ तत्र पुरु-
षः प्रधानं तस्योपकरणमन्यत् ॥ तस्मात्पुरुषोधिष्ठानं ॥
तद्दुःखसंयोगाद्व्याधिरित्युच्यते ॥ ते चतुर्विधाः आगंतवः
शारीरा मानसाः स्वाभाविकाश्चेति तेषामागंतवोभिघातनि-
मित्ताः ॥ शारीरास्त्वन्नपानमूला वातपित्तकफशोणितसं-
निपातवैषम्यनिमित्ताः ॥ मानसास्तु क्रोधशोकभयहर्षवि-
षादेर्ष्याभ्यसूयादैन्यमात्सर्यकामलोभप्रभृतयः ॥ तत्र ते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्तिकां गोमयं वापि नन्दिशायां तथोदकं नगोमूत्रं ब्रह्मदेशेऽन्यत्र गृह्णीयात्तु बुद्धिमान्नर इति यो
गियाज्ञवल्क्योपि गंधोदकांतं विधिवत्स्थापयेत्तत्र पृथक्पृथक् ततो त्रिधा कृत्वा मृदं तां तु गो
मयं तद्विचक्षणः अधमोत्तममध्यानामंगानां क्षालनं ततः भागैः पृथक्पृथक्कुर्यात्क्ष
क्षालने मृदसंकरमिति शौनकोपि प्रयतो मृदमादाय दूर्वापामार्गगोमयं एकदे
शे पृथक्कुर्यादिति वसिष्ठः मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि अधश्च
तिसृभिः कार्यं षड्भिः पादौ तथैव च प्रक्षाल्य सर्वकायं तु द्विराचम्य यथाविधीति
कायप्रक्षालनानंतरं भाविकर्तव्यमाह शौनकः गायत्र्यादित्यायप्रवहिष्यं ततो
देवा इति मृदमभिमंत्रयेत् ततो यतत इंद्र स्वस्तिदा विशस्पतिर्विवृत्रो विमृध इदं
मुद्रेनानेन तिमृदं प्रतिमंत्रं प्रतिदिशं क्षिपेत् पूर्वादिक्रमेण ततः संमार्जनं कुर्या
न्मृदा पूर्ववन्मंत्रवत् अश्वक्रांते इत्यादयो मृत्तिकामंत्रा यजुर्वेदप्रसिद्धाः पुनश्च
गोमयेनैवमग्रमग्रमिति त्रिभुवन् अग्रमग्रं चरंतीनां ओषधीनां रसं वने तासाम्
षभपत्नीनां पावनं कायशोधनं त्वं मे रोगांश्च शोकांश्च पापं च हर गोमयेति गोम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यमंत्रः कांडात्कांडादिति द्वाभ्यां अंगमंगमिति तिसृभिरिति अर्चयेदिति शेषः अपाघमप
किल्बिषमपकृत्यामपारपः अपामार्ग त्वमस्मदपदुःस्वप्नं सुवस्वाहेत्यपामार्गे
णांगमंगमुपस्पृशेत् अथ हिरण्यशृंगमयो देवीरसं वन विमुपस्थाय सुमित्रियान
इत्यपः स्पृष्ट्वा दुर्मित्रियाइति बहिः क्षिपेत् ततः इदं कृत्वा ऋतं चं वा पः प्रविश्य मनसा
जपेत् तत्र गायत्र्यामा मानि श्रुविवाव्याहृतीर्जपेत् शिवेन मे जपित्वेदमापइत्यप
आग्नवेदिति वसिष्ठः येते शतमिति द्वाभ्यां तीर्थान्यावाहयेत् यथा कुरुक्षेत्रं गयां
गंगां प्रभासं नैमिषं तथेति शौनकः प्रपद्ये वरुणं देवमंभसां पतिमीश्वरं याचितं देहि
मे तीर्थं सर्वपापापनुत्तये तीर्थमावाहयिष्यामि सर्वाघविनिषूदनं सान्निध्यमस्मि
न्विबतो ये स्थीयतां मदनुग्रहात् रुद्रान्प्रपद्ये वरदान्सर्वान प्सुषदस्तथा आपः पुण्याः
पवित्राश्च प्रपद्ये वरुणं तथा शमयंत्वाशु मे पापं रक्षंतु च सदैव मामिति वसिष्ठः आपो
हिष्ठेत्यापश्च दुपदादिवेत्यपि तथा हिरण्यवर्णा इति पावमानीभिरंरततः ततोऽर्कवीर
त्यचोंकारं निमज्ज्यान्तर्जले बुधः प्राणायामांश्च कुर्वीत गायत्रीं चाघमर्षणमिति वि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्स्वपि ततो मज्जमानस्त्रिरघमर्षणं तद्विष्णोः परमं पदमिति सावित्रीं वा युंजते मन इत्यनु
वाकं वा पुरुषसूक्तं वा स्नात आर्द्रवासा देवर्षिपितृतर्पणं तथा। एवं कुर्यादिति मेधा
तिथिरपि ततोंभसि निमग्नस्त्रिः पठेदघमर्षणं प्रदद्यान्मूर्ध्नि तथा महाव्याहृ
तिभिर्जलमिति वशिष्ठः स्नात्वा सम्यगुपस्पृश्य वासोन्यद्धृत्वा संशोधयेत्तदा अपवित्रीकृ
ते तेन कौपीनास्रावः वाससा यो नेन विधिना स्नाति यत्र तत्रांभसि द्विजः स तीर्थफ
लमाप्नोति तीर्थेष्वविहितं फलमिति तत्रानुकल्पमाह योगियाज्ञवल्क्यः यदाथवि
स्तृतः प्रोक्तः स्नानस्य विधिरुत्तमः असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते स्ना
नमंतर्जले चैव मार्जनाचमने तथा जलाभिमंत्रणं चैव तीर्थस्य परिकल्पनं अघमर्ष
णसूक्तेन त्रिरावृत्तेन नित्यशः स्नानाचरणमित्येतदुपदिष्टं महात्मभिरिति इति म
ध्याह्नस्नानम् अथ नैमित्तिकस्नानं तत्र मनुः दिवाकीर्त्तिमुदक्यां च पतितं सूति
कां तथा शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति दिवाकीर्त्तिश्चांडालः अंगिराः
शवस्पृशमथोदक्यां सूतिकां पतितं तथा स्पृष्ट्वा स्नानेन शुद्धिः स्यात्सचैलेन न संश

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न॰

पा॰मा॰
२३

यइति गोतमोपि पतितचांडालसूतिकोदक्याशवस्पृष्टिं स्पृष्टु पस्पर्शने सचैलं उदकोपस्पर्श
नाच्छुध्येदिति पतितादिस्पृष्टिं समारभ्य तृतीयस्य सचैलं स्नानं न चतुर्थस्य तस्योदकोप
स्पर्शनाच्छुद्धिः तथाचमरीचिः उपस्पृशेच्चतुर्थस्तु तदुच्छिष्टं प्रोक्षणं स्मृतं यत्तु संवर्त्तेन द
योरेव स्नानमुक्तं तत्स्पृष्टिं स्पृशेद्यस्तु स्नानं तस्य विधीयते ऊर्द्ध्वमाचमनं प्रोक्तं द्र
व्याणां प्रोक्षणं तथेति तदबुद्धिपूर्वस्पर्शविषयं तथाच संग्रहकारः अबुद्धिपूर्वक
स्पर्शे द्वयोः स्नानं विधीयते त्रयाणां बुद्धिपूर्वेतु तत्स्पृष्टिन्यायकल्पनेति कूर्मपु
राणे चांडालसूतिकशवैः संस्पृष्टं संस्पृशेद्यदि प्रमादात्तत आचम्य जपं कुर्या
त्समाहितः तत्स्पृष्टिस्पृष्टिनं स्पृष्ट्वा बुद्धिपूर्वं द्विजोत्तमः आचामेत विशुद्ध्यर्थं प्रा
ह देवः पितामहः याज्ञवल्क्योपि उदक्यासूतिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशे
त् अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृदिति एतद्द्वंद्वं चाबुद्धितः स्पर्शवि
षयं अन्यथाद्वयोः स्नानमित्यनेन विरोधः प्रसज्येत वस्त्रांतरितस्पर्शेनेतद्दं
गं तत्तिरितन्यायप्राप्तावाह प्रचेताः वस्त्रांतरितसंस्पर्शः सद्यः स्पर्शोऽभिधीयते

राम
२३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सान्तान्स्पृष्ट्वैव यत्प्रोक्तं तच स्नानदिनेपि चेति चतुर्विंशतिमते स्नानस्य निमित्तान्तरमुक्तं
बौद्धान्पाशुपतान्जैनान्लोकायतिककापिलान् विकर्मस्थान्द्विजान्स्पृष्ट्वा सचै
लोजलमाविशेत् कापालिकांस्तु संस्पृश्य प्राणायामोधिको मत इति चांगलादि.
स्पर्शनिमित्तस्नाने विशेषमाह विष्णुः स्नानार्हो यो निमित्तेन कृत्वा तोयावगाहनं
आचम्य प्रयतः पश्चात्स्नानं विधिवदाचरेदिति योगीयाज्ञवल्क्योपि तस्मिन्नेवा
वगाहेन यदा स्यादशुचिर्नरः आचम्य प्रयतः पश्चात्स्नानं विधिवदाचरेदिति
गार्ग्योपि कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च नित्यं याहच्छिकं चैव य
थारुचि समाचरेदिति इति नैमित्तिकस्नानप्रकरणम् अथ काम्यस्नानम्
पुलस्त्यः पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ अमावास्यां नदीस्नानं पुनात्या
सप्तमं कुलं चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ न प्रेतत्वमवाप्नोति गं
गायां च विशेषतः शिवलिंगसमीपे तु यत्तोयं पुरतः स्थितं शिवगंगेति विज्ञेयं तत्र
त्र स्नात्वा दिवं व्रजेदिति यमोपि कार्त्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते माघ्यां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पा॰मा॰
२४

10

स्नातः प्रयागे नु मुच्यते सर्वकिल्बिषैः ज्येष्ठे मासि सिते पक्षे दशम्यां हस्तसंयुते दशजन्मा
घहा गंगा तेन पापहरा स्मृतेति विष्णुः सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी अ
रुणोदयवेलायां तस्यां स्नानं महाफलं पुनर्वसुबुधोपेता चैत्रमासि सिताष्टमी स्रोतः
सु विधिवत्स्नात्वा वाजपेयफलं लभेदिति आदित्यपुराणे कार्तिके सकलं मासं नित्य
स्नायी जितेंद्रियः जपन् हविष्यभुक् स्नातः सर्वपापैः प्रमुच्यते तुलामकरमेषेषु
प्रातः स्नायी सदा भवेत् हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति मत्स्यपु
राणे आषाढादि चतुर्मासे प्रातः स्नायी भवेन्नरः विप्रेभ्यो भोजनं दत्वा कार्ति
क्यां गोप्रदो भवेत् स वैष्णवं पदं याति विष्णुव्रतमिदं स्मृतमिति मार्कण्डेयोपि
सर्वकालं तिलैः स्नानं पुण्यं व्यासोब्रवीन्मुनिः तुष्यत्यामलकैर्विष्णुरेकादश्यां
विशेषतः श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः सप्तमीं नवमीं चैव प
र्वकालं च वर्जयेदिति विष्णुः बालाश्च तरुणा वृद्धा नरनारीनपुंसकाः स्ना
त्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलम् माघमासे प्रयासि स्नात्वा विष्णुलोके

राम
२४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सगच्छतीति इति काम्यस्नानम् अथ मलापकर्षणस्नानं तच्च वामनपुराणे नाभ्यं
गमर्के न च भूमिपुत्रे क्षौरं च शुक्रे च कुजे च मांसं बुधे च योषित्परिवर्जनीया शेषे
षु सर्वेषु सदैव कुर्यादिति ज्योतिःशास्त्रेऽपि संतापः कांतिरल्पायुः धनं निर्धनतात
प्पा अनारोग्यं सर्वकामा इत्यभ्यंगाद्भास्करादिष्विति मनुरपि पक्षादौ च रवौ षष्ठ्यां
रिक्तायां च तथा तिथौ तैलेनाभ्यज्यमानस्तु धनायुर्भ्यां विहीयत इति गर्गोऽपि
पंचदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं विवर्ज
येत् बौधायनोऽपि अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः शिरोऽभ्यंगं वर्जयेत्तु
पर्वसंधौ तथैव चेति गर्गोऽपि न च कुर्यात्तृतीयायां त्रयोदश्यां तिथौ तथा शास्त्र
तीभूतिमन्विच्छन्दशम्यामपि पंडित इति एवं सर्वास्वपि तिथिष्वभ्यंगस्य निषेधे
प्राप्ते तैलविशेषेणाभ्यनुज्ञानाति प्रचेताः सार्षपं गंधतैलं च यत्तैलं पुष्पवासि
तं अन्यद्रव्ययुतं तैलं न दुष्यति कदाचनेति यमोऽपि घृतं च सार्षपं तैलं यत्तैलं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुष्पवासितं न दोषः पक्वतैलेषु स्नानाभ्यंगेषु नित्यशः ॥ इत्यभ्यंगस्नानम् ॥ क्रियांग
स्नानं तु निमस्नानवत् तत्रैवं प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेदित्यादि क्रियां
गस्नानं द्रष्टव्यं तस्य क्रियांगत्वं पुराणोक्त्या स्वीकृतं धर्मक्रियाकर्तुमनाः पूर्वं स्ना
नं समाचरेत् क्रियांगं तत्स्मृतं हि स्नानं वेदपरैर्द्विजैरिति ॥ अथ क्रियास्नान
म् तत्र शंखः क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकं मृद्भिरद्भिश्च कर्तव्यं
शौचमादौ यथाविधि जले निमग्न उन्मज्ज्य उपस्पृश्य यथाविधि तीर्थस्या
वाहनं कुर्यात्तत्प्रवक्ष्याम्यतः परं प्रपद्ये वरुणं देवमंभसां पतिमूर्जितं याचितं दे
हि मे तीर्थं सर्वपापापनुत्तये तीर्थमावाहयिष्यामि सर्वाघविनिषूदनं सान्निः
ध्यमस्मिन् क्रियतां तोये स्वीयतां मदनुग्रहादिति यद्यपि स्नानेषु मन्त्रात्कल्पनां
जलविशेषो विष्णुपुराणे निरूपितः नदीनदतडागेषु देवखातजलेषु च नित्य
क्रियार्थं स्नायीत गिरिप्रस्रवणेषु च कूपेषूद्धृततोयेन स्नानं कुर्वीत वाप्यवीति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तस्मात्पादेयमुच्यते तीर्थतोयं ततः पु
रं पा~~...~~नि×२

मार्कण्डेयोपि पुराणानां नरेंद्राणां महीक्षितां ये महात्मनां स्नानं कूपतडागेषु देवता
नां समाचरेत् भूमिस्थमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं ततोपि सारसं पुण्यं ततो
गांगं तु सर्वतः इति मरीचिः भूमिस्थमुद्धृतं वापि शीतमुष्णमथापि वा गांगं पयः पु
नात्याशु पापमामरणांतिकं निषिद्धजलमाह व्यासः अंतस्खेषु न स्नायात्तथैवा
संस्कृतेषु च अनाद्रीयेष्वपि न स्नायात्तथैवाल्पजलेष्वपि व्यासोपि नद्यां पञ्चपरि
अस्पृष्टं तथा पञ्च विनिःसृते गतप्रत्यागतं यच्च तत्तोयं परिवर्जयेत् शातातपोपि
अन्यैरपि कृते कूपे सेतौ वाप्यादिके तथा तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं समाचरे
दिति प्रतिप्रसवमाह मनुः अलाभे देवखातानां सरसां सरितां तथा उद्धृत्य चतुरः
पिंडान्पारक्ये स्नानमाचरेत् उष्णोदकनिषेधति शंखः स्नातस्य वह्नितप्तेन तथै
व परवारिणा शरीरशुद्धिर्विज्ञेया न तु स्नानफलं भवेदिति याज्ञवल्क्यः वृथो
ष्णोदकस्नानं वृथा जप्यमवैदिकं वृथा त्वश्रोत्रिये दानं वृथा भुक्तमसाक्षिकमि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ति यत्तूष्णोदकविधानं आपस्तम्बस्तदशक्तानां संवह्निर्विशोधकः ततः सर्वेषु कालेषु उष्णां
भः पावनं स्मृतमिति षट्त्रिंशन्मतेपि आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः तेन
संतः प्रशंसंति स्नानमुष्णेन वारिणेति तदनु रस्नानविषयं तत्रापि यमः आदित्यकि
रणैः पूतं पुनः पूतं च वह्निना आतुरस्नाने प्रशस्तं तत्रोष्णोदकमिति यत्तु तत्र
घायं तमेव स्नानं तन्नाम्रस्यात्पुष्णोदकस्नानमनिविद्धमित्याह यमः नित्यं नैमित्ति
कं चैव क्रियांगं मलकर्षणं तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैरिति यदपि वृ
द्धमनुनोक्तं मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा अस्पृश्यस्पर्शने चैव न स्ना
यादुष्णवारिणा संक्रांत्यां भानुवारे च सप्तम्यां राहुदर्शने आरोग्यपुत्रमित्रार्थं न स्नाया
दुष्णवारिणा पौर्णमास्यां तथा दर्शे यः स्नायादुष्णवारिणा स गोहत्याकृतं पापं
प्राप्नोतीह न संशय इति तत्रोक्तेषु मरणादिषु नोष्णोदकैः स्नायात् अपि तु परकी
येन कृतोदके नैमुक्तमिति न विरोधः उष्णोदकस्नाने विशेषमाह व्यासः शीता
स्वप्सु निषिच्योष्णा मंत्रसंभारसंभृताः गेहेपि शस्यते स्नानं तद्धीनमफलं वहिमि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ति गोलं तु स्नानं तु तत्र तत्र स्वयमेव वक्ष्यति अथ संध्याविधिः तत्र संध्यास्वरूपं दक्षो द-
र्शयति अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः सा तु संध्या समाख्याता मुनिभि-
स्तत्त्वदर्शिभिरिति यद्यपि कालविवाचकत्वेनात्र संध्याशब्दः प्रतीयते तथापि तस्मि-
न्काल उपास्या देवता संध्याशब्देनोपलक्ष्यते तथा च देवताया उपासनमुपल-
क्ष्यमूलत्वेनैककर्मपरत्वेन संध्याशब्दः प्रयुक्तः अथवा संधौ भवा नित्या सं-
ध्या अतएव व्यासः उपास्ते संधिवेलायां निशायां दिवसस्य वा तामेव संध्यां
तस्मात्तु प्रवदंति मनीषिण इति तां क्रियां विदधाति योगियाज्ञवल्क्यः संधौ सं-
ध्यामुपासीत नास्तंगते नोदिते रवाविति सा च संध्या त्रिविधा तदुक्तं महर्षिणा संध्या-
त्रयं तु कर्तव्यं द्विजेनात्मविदा सदेति तत्र कालभेदेन देवतानां नामादिभेदमाह
व्यासः गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने सरस्वती च सायाह्ने सैव संध्या
त्रिषु स्मृता प्रतिग्रहादन्नदोषात्पातकादुपपातकात् गायत्री प्रोच्यते तस्माद्गा-
यंतं त्रायते यतः सवितृद्योतनात्सैव सावित्री परिकीर्तिता जगतः प्रसवित्री वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पा. मा.
९६

वाग्रूपत्वात्सरस्वतीति वर्णभेदः स्वरान्तरेणाभिहितः गायत्रीत्वभवेदृक्सा सावित्री शुक्लाव
र्णिका सरस्वती तथा कृष्णा उपास्या वर्णभेदतः गायत्री ब्रह्मरूपा तु सावित्री रुद्ररू
पिणी सरस्वती विष्णुरूपा उपास्या रूपभेदत इति उपासनमभिध्यानं स्नानपर्वतेति
गीयब्रह्मणे. उद्यन्तमस्तं यान्तमादित्यमभिध्यायन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुते
सावादित्यो ब्रह्मेति च मन्त्रब्राह्मणेति परावेवेति अस्यार्थः वक्ष्यमाणप्रकारेण
प्राणायामादिकं कर्म कुर्वन्यथोक्तनामवर्णरूपोपेतं संध्याशब्दवाच्यमादित्यं
ब्रह्मेति ध्यायन्नैहिकमामुष्मिकं च सकलं भद्रमश्नुते यथाविधोक्तध्यानेन शुद्धां
तःकरणो ब्रह्मसाक्षात्कृत्य तेन सर्वमपि ब्रह्मैव सन् प्रज्ञानाज्जीवत्वं प्राप्नोति यथो
क्तज्ञानेन तद् ज्ञानापगमे ब्रह्मैव प्राप्नोतीति व्यासोप्येतदेवाभिप्रेत्याह नभि
नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह सोहमस्मीत्युपासीत विधिना येन केनचि
दिति तत्र प्रातः संध्यायाः कालपरिमाणमाह दक्षः रात्र्यन्त्ययामनाडिके संध्या
दिः काल उच्यते दर्शनाद्रविरेखायास्तदन्तो मुनिभिः स्मृतेति अथ संगवं प्रातःसं

16

राम
९६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ध्यायां गौणः कालः। अर्धप्रदोषावसानं च सायंसंध्याकालः। तदाह दक्षः। न प्रा
तर्न प्रदोषे च संध्याकालोतिवर्तते अर्घ्यकालोत्तरं कल्प्यं सर्वेष्वेव कर्मणा
मृतमिति। कर्माङ्गप्राणायामसंध्योपास्तिप्रकारो दर्शितः। प्राक्कूलेषु ततः स्थित्वा द
र्भेषु सुसमाहितः। प्राणायामत्रयं कृत्वा ध्यायेत्संध्यामिति श्रुतिरिति याज्ञवल्क्यो
पि प्राणानायम्य संप्रोक्ष्य त्र्यृचेनाब्दैवतेन त्विति। बृहस्पतिः। उपासनं नियम्या
सनं न्यस्त्वा वर्णादिकं तथा। सनिमीलितदृङ्मौनी प्राणायामं समभ्यसेत्। प्राणा
यामलक्षणं मनुराह। सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदाय
तप्राणः प्राणायामः स उच्यते। याज्ञवल्क्यः। गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपू
र्विकां। प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः। भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव
च। प्रत्योंकारसमायुक्तास्तथा तत्सवितुः पदं। ओमापो ज्योतिरित्येतच्छिरः पश्चा
त्प्रयोजयेत्। त्रिरावर्तनयोगात्तु प्राणायामस्तु शब्दित इति। स च प्राणायामः पू
रककुंभकरेचकभेदेन त्रिविधो ज्ञेयः। तथा च योगियाज्ञवल्क्यः। पूरकः कुंभ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कोरेच्यः प्राणायाममखिलं तु गः नासिकाकृष्टउच्छ्वासो ध्मातः पूरकउच्यते कुंभको
निश्चलश्वासो निःश्वासमानस्तु रेचकः मार्जनमाह व्यासः आपोहिष्ठाद्यृचैः कुर्यान्मा
र्जनं तु कुशोदकैः प्रणवेन तु संयुक्तं क्षिपेद्वारि पदे पदे विप्रुषोऽष्टौ क्षिपेदूर्ध्व
मधो यस्तु तया युजित् रजस्तमो मोहजातान् जाग्रत्स्वप्नसुषुप्तिजान् वाङ्मनः
कायजान्दोषान्नवैतान्नवभिर्दहेदिति प्रजापतिरपि कुशाग्रेमार्जनं कुर्यात्सं
यतो नैवासमाहितः अर्धवीते पुनर्वा कुर्याच्छिद्रा नामनमी हृशामिति तामेना
पि मार्जनार्चनबलिकर्मभोजनानि देवतीर्थेन कुर्यात् नच मार्जनेन धारा तु
तो कार्या तथा च बुला धारा त्रुनेन तोयेन संध्योपास्तिर्विगर्हिता पितरो न
प्रशंसन्ति न प्रशंसन्ति देवताः कथं तर्हि मार्जनमिति तत्राह सरावं न प्राती
र्थे हृदे वापि भाजनेन मृण्मये पि वा औदुंबरे च सौवर्णे राजते ताम्रसंभवे कृत्वा
तु वामहस्ते वा संध्योपास्तिं समाचरेदिति कृत्वोदकमिति शेषः मृण्मयादि
पात्रसद्भावे तु वामहस्तस्य प्रतिषेधः वामहस्ते जलं कृत्वा ये तु संध्यामुपास

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हस्रेत्योमिति स होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमिति होवाच
कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्यो
मिति होवाच कत्येव देवता याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवता याज्ञव
ल्क्येति अध्यर्द्ध इत्योमिति होवाच कत्येव देवता याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते
त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति स होवाच महिमान एवैषामेते त्रयस्त्रिंश
द्देवा इति कतमे ते त्रयस्त्रिंशदिति अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त ए
कत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति कतमे वसव इति अग्निश्च पृथि
वी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं सर्वं
वसु हितमेते हीदं सर्वं वासयन्ते तद्यदिदं सर्वं वासयन्ते तस्माद्वसव इति कतमे रुद्रा
इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ
रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति कतम आदित्या इति द्वादश वै मासाः संवत्स

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पा॰मा॰
६९

20

रस्यैत आदित्या एते हीदं सर्वमाददाना यन्ति ते यदिदं सर्वमाददाना यन्ति तस्मादादि
त्या इति कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति
कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति कतमे ष
डित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्चैते षडेते हीदं सर्वं ष
डिति कतमे ते त्रयो देवा इति इमे च त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ
द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्द्ध इति योयं पवत इति तदाह व
यदयमेक इवैव पवतेऽथ कथमध्यर्द्ध इति यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेना
ध्यर्द्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षत इति अस्याः श्रु
तेरयमर्थः उपासनार्थानां देवानां संख्याविस्तारे कतीति शाकल्येन पृ
ष्टो याज्ञवल्क्यो विजिगीषुकथायाः प्रवृत्तत्वात्संक्षिप्याभ्यामोत्तरयन्निविदा प्रत्यु
त्तरं प्रतिपेदे निविच्छब्दो वैश्वदेवनामके शास्त्रविशेषे पठितानां संख्यावा

राम
६९

ते सायंसंध्यावबलीमेयागसुरात्वेऽनर्पिताइतिस्मरणात् मन्त्रमयाघमर्षणं कृ
त्वात् वामहस्तेन दक्षिणेन तु वामहस्तविधानात् एवमुक्तविधिना मार्जयित्वा सूर्य
श्चेत्यपः पिवेत् तत्र बोधायनः अथातः संध्योपासनविधिं व्याख्यास्यामः ती
र्थं गत्वा शुचिरोऽभिषिक्तः प्रक्षालितपाणिपादोपस्पृश्य अग्निश्च मामन्युश्चेति सा
यमपः पीत्वा सूर्यश्च मामन्युश्चेति प्रातः सावित्र्या च लवणमन्त्रा लिङ्गाभिर्वारुणी
भिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिरन्यैश्च पवित्रैरात्मानं प्रोक्ष्य पूतो
भवतीति भरद्वाजः सायमग्निश्चमेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत् आपः पुनंतु
मध्याह्ने तत्राचमनं चरेदिति कात्यायनोपि शिरसो मार्जनं कुर्यात्कुशैः सोद
कबिंदुभिः प्रणवो भूर्भुवः स्वस्तिगायत्री च तृतीयका अब्दैवतं त्र्यृचं चैव चतुर्थमि
ति मार्जनमिति मार्जनानंतरं प्रजापतिः जलपूर्णे तथा हस्ते नासिकाग्रसमर्पिते
न्ते ऋतं चेति पठित्वा तज्जलं तु क्षितौ क्षिपेत् ततः सूर्यायार्घं दद्यात् तथा च व्या
सः करांभ्यां तोयमादाय गायत्र्या चाभिमंत्रितं आदित्याभिमुखस्तिष्ठन्त्रिरूर्ध्वं सं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षिपेदिति स्मृतेरपि सावित्र्याभिमंत्रितमुदकं पुष्पमिश्रमंजलिना क्षिपेदिति अर्घदाने
मंत्रांतरमुक्तं विष्णुना कराभ्यामंजलिं कृत्वा करस्पर्शसमाहितः उदुत्यमितिमंत्रेण तत्तोयं च
क्षिपेत् कुर्वीत ततः प्रदक्षिणं कृत्वोदकं स्पृशेत् तदुक्तं पुराणे सायंमप्येवदाचम्य प्रोत्स्य सूर्यस्य
चांजलिं दत्वा प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुध्यतीति श्रुतिरपि यत्प्रदक्षिणं प्रक्रमेति
तेन पाप्मानमवधुन्वंतीति कूर्मपुराणे अथोपतिष्ठेदादित्यमुदयंतं समाहितः मंत्रैस्तु
विविधैः सौरैर्ऋग्यजुःसामसंभवैरिति उपस्थानं तु स्वशाखोक्तमंत्रैः कार्यं उपस्था
नं स्वकैर्मंत्रैरादित्यस्य तु कारयेत् इति वशिष्ठस्मरणात् उपस्थानं तु कूर्मपुराणे श्लो
कित्यादिना प्रपंचितं प्राक्काले स्थित्यादितोपस्थानपर्यंतं प्रातःसंध्यायामुपवर्णितम्
तदितरयोः संध्ययोः समानं तत्र मध्याह्नसंध्याया विशेषो नारायणेनाभिहितः आपः
पुनंतु मंत्रेणाप्याचोक्षितेति मार्ज्जनम् प्रक्षिप्य चांजलिं सम्यग् उदुत्यं चित्रमित्यपि तच्च
क्षुर्देव इति च हंसः शुचिषदित्यपि एतज्जपेदूर्ध्वबाहुः सूर्यं पश्यन्समाहितः गायत्रीं
तु यथाशक्ति उपस्थाय दिवाकरमिति कालविशेषप्राशस्त्येन दर्शितः प्रातःसंध्यां
सनक्षत्रां मध्यमां स्नानकर्मणि सादित्यां पश्चिमां संध्यामुपासीत यथाविधीति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृतत्वं तिजनिशाने धातोर्दीर्घो निपातनात् चोः कुरिति गः खसेश्चपा इति कः षत्वणत्वे तीक्ष्णं तीक्ष्णं सामुद्रलवणे विषलोहाजिह्म
ख्यके क्लीवं यवाग्रके पुंसीति ग्मात्मत्या शिनो श्लिषु तिमेदिनी श्लिष आलिंगने श्लिषेरिकारस्यात्वं निपातनात् षढोरिति कः
षत्वं श्लक्ष्णं मनादेर्युः युप्रत्ययमाह मन ज्ञाने निपातनान्न युधातोरित्यनादेशः मन्युः मन्युर्दैन्ये क्रतौ क्रुधि दसु उपक्षये दस्युः दस्यु
श्चौरे रिपौ पुंसीति मेदिनी जनी प्रादुर्भावे जन्तुः [illegible] जन्तुः स्यान प्राण्य [illegible] इति मेदिनी मङ्कुः [illegible] त्युक् प्रत्ययमाह [illegible]
णः मङ्कुः प्राणित्याजे मृत्युः मृत्युर्नामरणे यमे इति मेदिनी सर्तेरयुः [illegible] प्रत्ययमाह सृ गतौ सरजौ सरयुः नदी प्रादेः पः यप्रत्ययमाह
पारस्त्रे पातिरक्षत्यात्मानमिति पापं णीञ् प्रापणे नीचः पुरोहितः विप्रः आप्नो [illegible] पानीयं प्रादेः किल् पक् प्रत्ययमाह णीञ् प्रा
पणे नीपः नीपः कदंबबन्धूक नीलाशोके द्रुमेपि चेति मेदिनी [illegible] वाहुलकाद्दीर्घः [illegible] इति मेदिनी
कुशब्दे वाहुलकाद्दीर्घः कुवति मण्डूकोऽस्मिन्निति कूपः शिल्यादपः पक् प्रत्ययान्ता निपात्यन्ते शील समाधौ [illegible] निपातनात् शि
लं कौशलं शष्प हिंसायां निपातनात् षष्प शष्पं बालतृणेपि च पुंसि स्यात्प्रतिभाहीने इति मेदिनी शष्पं बालतृणं घासः इत्यमरः
वाषृ वीजोद्गमे घस्य षत्वं निपातनात् वाष्पः वाष्पो नेत्रजलोष्मणोरिति विश्वः वाष्प [illegible] इति च [illegible] दीर्घत्वं
निपातनात् रूपं रूपं स्वभावे सौन्दर्ये इति विश्वः [illegible] हिंसायां निपातनादुरः [illegible] इति दीर्घः [illegible] स्फोटनं [illegible] इत्यमरः
स्तनादेश्चेत्वादित्नुः इत्नु प्रत्ययमाह स्तन गदद् देवशब्दे चुरादिरन्तो गणे [illegible] स्तनयित्नुः पुमान्वारिधरे [illegible]
पि चेति मेदिनी स्तनयित्नुः पयोवाहे [illegible] गरोगयोरिति विश्वः गदयित्नुः पुमान्कामे जल्पाके कार्मुके चेति विश्वः दमाम्यां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

॥ गणेशाय नमः॥ श्रीसनत्कुमार उवाच ॥ गयायात्रां प्रवक्ष्यामि प्रसस्यनारद मुक्ति
॥१॥ निःकृतिस्त्विष्कर्तृणां ब्रह्मणागीयते पुरा॥१॥ सूत उवाच॥ इति श्रुत्वा ततो वाक्यं
नारदो मुनिसत्तमः॥ सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्वकं ॥२॥ श्रीनारद उवाच॥
सनत्कुमारमे ब्रूहि तीर्थानामुत्तमोत्तमं ॥ तारकं सर्वभूतानां मृत एव तां पठितां
सदा ॥३॥ श्रीसनत्कुमार उवाच ॥ वक्ष्ये तीर्थपरं पुण्यं श्राद्धादौ सर्वतारकं॥
गयातीर्थं च विख्यातं तीर्थेभ्योप्यधिकं शृणु ॥४॥ गयासुरस्तपस्तेपे ब्रह्मणा त
त्र जगाम वै ॥ छलेन पातयित्वा वै शिला धर्मेण धारयत ॥५॥ तत्र ब्रह्मणा
करो यागं सर्वपापविनाशकं गदाधरं ॥ फल्गुतीर्थस्वरूपेण निश्चला र्यमहर्निशं॥६॥
कृतयज्ञो ददौ ब्रह्मणा ब्राह्मणेभ्यो गृहादिकं ॥ श्वेतकल्पे तु वाराहे गयायां सर्व
संगमे ॥७॥ जयानाम्ना गयास्थानं दत्तं ब्रह्मर्षिकां क्षितं ॥ कांक्षंति पितरः पु

रामः
१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA